प्र.1 उचित विकल्पं चित्वा लिखत –

(i) माहेश्वर सूत्राणि सन्ति –

(अ) द्वादश (ब) त्रयोदश

(स) चतुर्दश (द) पञ्चदश

(ii) 'क' वर्णस्य उच्चारणस्थान अस्ति –

(अ) कण्ठ (ब) तालु

(स) नासिका (द) औष्ठ

(iii) स्वर वर्णः अस्ति –

(अ) म (ब) त

(स) च (द) अ

(iv) 'सज्जनः' इत्यस्य पदस्य सन्धि विच्छेदः अस्ति –

(अ) सज + जनः (ब) सत् + जनः

(स) सज + जनः (द) सज्ज + नः

(v) 'पुस्तकालयः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) स्वर सन्धिः

(ब) व्यंजन सन्धिः

(स) विसर्ग सन्धिः

(द) दीर्घ सन्धिः

(vi) 'गणेशः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) यण

(ब) वृद्धि

(स) गुण

(द) दीर्घ

प्र.2 उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत –

(i) 'परिवारः' इत्यस्य उपसर्गः........................................ (परि / वारः)

(ii) 'प्राचीनम्' इत्यस्य विलोमपदम्........................................ (पुरा / नवीनम्)

(iii) 'नीरसः' इत्यस्य विलोमपदम्........................................ (सरसः / विरसः)

(iv) 'पर्वतः' इत्यस्य पर्यायपदम्........................................ (नरेन्द्रः / नगेन्द्रः)

(v) 'भूपति' इत्यस्य पर्यायपदम्........................................ (नृपः / अमात्यः)

(vi) 'प्राचार्यः' इत्यस्य उपसर्गः........................................ (आचार्यः / प्र)

प्र.3 युग्ममेलनं कुरुत –

| (अ) | (ब) |
| --- | --- |
| (i) सरस्वती | (क) तीरे |
| (ii) आम्रम् | (ख) अलीनाम् |
| (iii) पवनः | (ग) सत्वरम् |
| (iv) तटे | (घ) समीरः |
| (v) भ्रमराणाम् | (ङ) वाणी |

प्र.4 एकवाक्येन उत्तरं लिखत – (1×6=6)

(i) 'पठ्' धातोः लट्लकार उत्तमपुरुष एकवचनम् रूपं लिखत।

(ii) 'गच्छति' इति पदस्य धातुः लिखत।

(iii) 'अहं अपि विद्यालयं गच्छामि' अस्मिन् वाक्ये अव्ययपदं लिखत।

(iv) 'विद्या माता इव रक्षति' अस्मिन् वाक्ये अव्ययपदं लिखत।

(v) 'चल्' धातोः लृट्लकार प्रथमपुरुष बहुवचनम् रूपं लिखत।

(vi) 'बालकस्य' इत्यस्य का विभक्तिः अस्ति?

प्र.5 शुद्धकथनानां समक्षं 'आम्' अशुद्धकथनानां समक्षं 'न' इति लिखत –

(i) त्रय स्वर वर्णाः सन्ति।

(ii) 'रामाय' इत्यत्र तृतीया विभक्तिः अस्ति।

(iii) 'पठिष्यामः' पदे लृट्लकारः अस्ति।

(iv) 'फलम्' इति शब्दः पुल्लिंगः अस्ति।

(v) 'अवदत्' लङ्लकारस्य धातुरूपं अस्ति।

प्र.6 कविः क्वां सम्बोधयति? (2)

<u>अथवा</u>

निर्धनायाः दुहिता मञ्जूषायां कानि अपश्यत्?

प्र.7 कालः कस्य रसं पिबति? (2)

<u>अथवा</u>

सज्जनानां मैत्री कीदृशी भवति?

प्र.8 कुत्र दरिद्रता न भवेत्? (2)

<u>अथवा</u>

कुम्भकारः घटान् किमर्थं रचयति?

(2)

प्र.9 वसन्ते किं भवति?

अथवा

जन्तवः केन तुष्यन्ति?

(2)

प्र.10 सरोवराणां हानिः कदा भवति?

अथवा

कविः वाणीं किं कथयति?

(2)

प्र.11 रेखांकित पदमाधृत्य प्रश्ननिर्माणं कुरुत – (कोऽपि द्वौ)

(i) ग्रामे <u>निर्धना स्त्री</u> अवसत्।

प्र.15 पञ्चमीविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत – (2)

(i) जनः........................................................................बहिः आगच्छति। (ग्राम)

(ii) नद्यः........................................................................निरसरन्ति। (पर्वत)

(iii) ........................................................................पत्राणि पतन्ति। (वृक्ष)

(iv) प्रभुः भक्तं........................................................................निवारयति। (पाप)

प्र.16 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत –

(i) उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः

(ii) मल्लिका पूजार्थं मोदकानि रचयति।

(iii) चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति।

(iv) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं प्रति गच्छति।

प्र.17 स्वपाठ्यपुस्तकात् सुभाषितद्वयं लिखत यः प्रश्नपत्रे नास्ति। (2)

प्र.18 अधोलिखित गद्यांशाधारित प्रश्नानां उत्तराणि लिखत – (3)

पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्। "सूर्यातपे तण्डुलान् खगेभ्यो रक्ष"। किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्।

(क) ग्रामे का न्यवसत्?

## अथवा

तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत्। तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यम् ज्ञातवती। सूर्यातपे तण्डुलान् निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामापि तत्रैवाकारयत्। प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत् – 'भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ।

(क) ग्रामे का न्यवसत्?

(ख) तत्र गत्वा सा काकं किं प्रावोचत्?

(ग) 'तस्या अपि एक पुत्री' इत्यस्मिन् वाक्ये अव्ययपदं लिखत।

प्र.19 अधोलिखित पद्यांशाधारित प्रश्नानां उत्तराणि लिखत – (3)

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।

अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।

(क) किं यत्नेन संरक्षेद्?

(ख) कस्मात् क्षीणः मानवः हता?

(ग) कं येति याति च?

प्र.20 अधोलिखित नाट्यांशाधारित प्रश्नानां उत्तराणि लिखत – (3)

मल्लिका – भोः! अत्र पूजनं न भविष्यति। अहं स्वसखीभिः सह श्वः प्रातः काशीविश्वनाथमन्दिरं प्रति गमिष्यामि, तत्र गङ्गास्नानं धर्मयात्राञ्च वयं करिष्यामः।

चन्दनः – सखीभिः सह! न मया सह।

मल्लिका – आम्। चम्पा, गौरी, माया, मोहिनी, कपिलादयः सर्वाः गच्छन्ति। अतः मया सह तवागमनस्य औचित्यं नास्ति। वयं सप्ताहान्ते प्रत्यागमिष्यामः। तावत्, गृह–व्यवस्थां, धेनोः दुग्धदोहनव्यवस्थाञ्च परिपालय।

(क) मल्लिका पूजार्थं सखीभिः सह कुत्र गच्छति स्म?

(ख) किम् दुग्धदोहनं परिपालय?

(ग) वयं कदा प्रत्यागमिष्यामः।

## अथवा

चन्दनः – नमस्करोमि तात! पञ्चदश घटान् इच्छामि। किं दास्यसि?

देवेश – कथं न? विक्रयणाय एव एते। गृहाण घटान्। पञ्चशतोत्तर – रूप्यकाणि च देहि।

चन्दनः – साधु! परं मूल्यं तु दुग्धं विक्रीय एव दातुं शक्यते।

देवेशः – क्षम्यतां पुत्र! मूल्यं विना तु एकमपि घटं न दास्यामि।

मल्लिका – (स्वाभूषणं दातुमिच्छति) तात! यदि अधुनैव मूल्यम् आवश्यकं तर्हि, गृहाण एतत् आभूषणम्।

(क) मल्लिका किं दातुमिच्छति?

(ख) चन्दनः कति घटान् इच्छति?

(ग) 'मूल्यं विना तु एकमपि घटं न दास्यामि' इति कः कथयति?

प्र.21 अधोलिखित अपठित गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत – (4)

सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनं मन्यते। विद्यया एव जनाः ज्ञानन्ति यत् किं कर्तव्यम् अस्ति किं च अकर्तव्यम्। अनया एव ज्ञायते यत् किम् उचितम् अस्ति किं च अनुचितम्। विद्याधनेन एव वयं जानीमः यत् कः सन्मार्गः अस्ति कः च कुमार्गः। विद्यया एव मनुष्यः संसारे सम्मानं प्राप्नोति।

(क) अस्य गद्यांशस्य शीर्षकं लिखत।

(ख) विद्यया किं ज्ञायते?

(ग) किं धनम् उत्तमं मन्यते?

(घ) कया मनुष्यः सम्मानं प्राप्नोति?

प्र.22 स्वप्राचार्यस्य कृते अवकाशार्थं एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत। (4)

**अथवा**

शुल्कक्षमापनार्थं प्रधानाचार्यं प्रति पत्रं संस्कृतभाषायां लिखत।

प्र.23 अधोलिखितेषु विषयेषु एकं विषयं स्वीकृत्य विंशत्याधिक शतशब्देषु (120) संस्कृतभाषायां निबंधं लिखत – (4)

(क) महाकविः कालिदासः

(ख) अनुशासनम्

(ग) पर्यावरणम्

(घ) संस्कृतभाषायाः महत्त्वम्